मार्च २०१८ (वै. २०७४-७५)
फाल्गुन शु० चतुर्दशी तः चैत्र शु० पूर्णिमा पर्यन्तम्

ISSN: 2347-1565
मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-५ अङ्कः-८



सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565

मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ मार्च २०१८ अङ्कः-८

( फाल्गुन शु० चतुर्दशी तः चैत्र शु० पूर्णिमा पर्यन्तम् वै. २०७४-७५ )

सम्पादकः

डॉ0 जीतराम भट्ट :

सचिवः

सहायक सम्पादकः

प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन **(दिल्लीसंस्कृतअकादमीपक्षे)**

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

जीवनोत्कर्षाय मानः स्वाभिमानो वा आवश्यकः किन्तु अभिमानः अहंकारो वापकर्षायैव भवति। उक्तञ्च-विद्याददाति विनयं विनयाद्याति पात्रताम्। पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम्। यः विद्वान् भवति सः विनम्रो भवति। विद्वत्तायाः लक्षणमस्ति विनम्रता। श्रद्धावाँल्लभते ज्ञानम्। यस्य मनसि श्रद्धा भवति सः एव ज्ञानार्जनं करोति। श्रद्धावानेव विनम्रोऽपि भवति। विनम्रतया यत्र योग्यतायाः विकासो भवति तत्रैव लोकेऽपि मानः प्राप्यते। अहंकारी जनः कस्मै अपि न रोचते। अभिमानी स्वस्य हानिस्तु करोति एव समीपस्थान् जनान्नपि उद्वेलयति। परिवेशे भयं ईर्ष्यां घृणाञ्च जनयति। ज्ञानेन कदापि अहंकारो न वर्धते। योऽहंकारी भवति सः ज्ञानी न भवति। यथोक्तं च- नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः

शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन।।

येषु गुणाः न भवन्ति त एव शुष्कवृक्षाणां सदृशाः अनम्राः भवन्ति। ये तु गुणवन्तः विद्यावन्तश्च भवन्ति ते सर्वदैव नमन्ति। विद्यार्थिभिः विद्यार्जनाय सफलतायै च विनम्रतैवाङ्गीकरणीया। यतः विनम्रश्छात्रः सुयोग्यः भवति। संस्कृते योग्यः छात्रः योग्यः नागरिकः कथं भवितव्यः इत्यस्मिन् विषये विविधा उपायाः वर्णिताः सन्ति। अतः छात्रैः संस्कृतम् अवश्यं पठितव्यम्।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका।।**

**निवेदकः**
**डॉ. जीतरामभट्ट :**
**सचिवः**

क्र.सं. अनुक्रमणिका 'संस्कृत-चन्द्रिका'-५/८ पृ.सं.


सम्पादकीयम्

डॉ0 जीतराम भट्ट:

१. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी....................................१

-डॉ० रामकिशोर मिश्र:

२. सर्वात्माना पिता परमात्मा........................................................२

-डॉ० सुदेश:

३. वर्षावर्णनम्..............................................................................४

-ओम प्रकाश ठाकुर:

४. बीरबाला...................................................................................५

-डॉ० कैलाशनाथ: द्विवेदी

५. प्रतिफलम्..................................................................................८

-डॉ० वेणीमाधवशास्त्री

६. दयालु: सर्व-प्रिय:.....................................................................१०

-नितेश कुमार

७. इयं मे प्रार्थना भगवन्..............................................................११

-डॉ० देवीसहाय पाण्डेय:

८. सुरम्य-भारतं भजे.....................................................................१३

-डॉ० रामचन्द्र: द्विवेदी

९. देशप्रेमी नरेन्द्र..........................................................................१७

-पंकज कुमार: झा

# जननी जन्मभूमिश्च स्वर्गादपि गरीयसी

- डॉ० रामकिशोर मिश्रः

लक्ष्मणं राम उवाच वनाऽऽगमनकारणात्
अहमनुज! लङ्कायां प्रवेशं कर्तुमक्षमः॥१॥

विभीषणं सह नीत्वा लक्ष्मण! त्वं लङ्कां व्रज।
सिंहासने ह्युपवेश्य तद्राजतिलकं कुरु।

लक्ष्मणेन तत्र गत्वा लङ्काया दर्शनं कृतम्।
मनोऽत्र मोहितं तस्य लङ्कासुन्दरशोभया॥

अशोकवाटिकापुष्पैस्तस्य मनः आकर्षितम्।
लङ्कास्वर्णचमत्कृत्या तद्धृदयं चमत्कृतम्॥

प्रदाय विभीषणाय लङ्काराज्यं स लक्ष्मणः।
समरशिविरे भ्रातृरामस्य पार्श्वमागमत्॥

सुन्दरनगरी लङ्का लक्ष्मणेन प्रशंसिता।
वसेयं किञ्चित्कालाय तत्र मे मनः इच्छति॥

स्वर्गसमा लङ्काशोभाऽयोध्याशोभा ततोऽधिका।
मया सहाऽयोध्यां गच्छेः रामो लक्ष्मणमब्रवीत्॥

अपि स्वर्णमयी लङ्का न मे लक्ष्मण! रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥

-२९५/१४ पट्टीरामपुरम्,
खेकड़ा, बागपत
उत्तर प्रदेशः-२५०१०१

# सर्वात्माना पिता परमात्मा

- डॉ० सुदेशः

एकदा द्वे मित्रे आस्ताम्। एकः सिक्खबालकः, द्वितीयः हिन्दुबालकः आसीत्। गुरुनानक-जयन्त्याम् सिक्खबालकः वदति-

**सिक्खबालकः**-"अद्य अस्माकं धर्मस्य संस्थापकस्य गुरुनानक महोदयस्य जन्मदिवसः अस्ति। सः सिक्खधर्मस्य स्थापनाम् अकरोत्। सः एव अस्माकं गुरुः अस्ति।

**हिन्दुबालकः**- (स्वमनसि-अस्माकं हिन्दुधर्मस्य संस्थापकः कोऽस्ति, अस्माकं गुरुः कः) सः गृहम् आगत्य स्वमातुः पृच्छति-मात! अस्माकं हिन्दुधर्मस्य संस्थापकः कोऽस्ति?

**माता**- (स्वमनसि चिन्तयन्-को गुरु?) प्रकाशम्- अहम् तु न जानामि। मध्ये एव-

**हिन्दुबालकस्यानुजः**- अस्माकं अनेके गुरवः सन्ति। यथा- रामः, कृष्णः, हनुमान् इत्यादयः। तेषु एव हिन्दुधर्मस्य संस्थापकः भविष्यति।

**हिन्दुबालकः**- एतेषां गुरुणाम् अपि कोऽपि गुरुः अवश्यमेव भविष्यति। चर्चाम् मध्ये-

**एकः सज्जनः**- एतेषां गुरुणाम् अपि गुरुः परमपिता परमात्मा शिवोऽस्ति। एते गुरुवः तु अस्माकं पूर्वजाः सन्ति।

**रामभक्तः**- रामः एव परमात्मा अस्ति। सैव सर्वेषां रक्षति। स एव सर्वेषां पालनं करोति। सैव अस्माकं गुरु अस्ति।

**कृष्णभक्तः**- न,न,। श्रीकृष्णः एव भगवान् अस्ति। सः एव गीतायाः उपदेशं अकरोत्। श्रीकृष्णः एव अस्मान् दुःखेभ्यः विमुक्तवान्।

**एकः सज्जनः**- शान्तम्, शान्तम्। सर्वे ध्यानेन शृण्वन्तुपरमात्मा कोऽस्ति ? यः सर्वेषां आत्मानाम् पिता अस्ति अर्थात् सर्वे आत्मानः यम् पिता रूपेण, परमात्मा रूपेण च स्वीकुर्वन्तु सैव परमात्मा। श्रीकृष्णम् रामम् च मुस्लिमधर्मस्य, सिक्खधर्मस्य च आत्मानः स्वपिताः परमात्मा च न स्वीकुर्वन्ति। अत एव एतेषु कोऽपि परमात्मा नाऽस्ति। सर्वे एव पुरुषार्थानुसारं दिव्यात्मानः सन्ति। एते दिव्यात्मानः सतयुगे वसन्ति।

**हिन्दु बालकः**- तर्हि परमपिता परमात्मा शिवः कोऽसि? सः कुत्र अस्ति?

**सज्जनः**:- शिवः सर्वेषां आत्मानां (हिन्दु, मुस्लिमः सिक्खः इत्यादयः) पिता अस्ति। सः ब्रह्मलोके वसति। सैव कलियुगस्य अन्तिमे चरणे (अधर्मस्य समये) आगत्य सर्वेषां उद्धारं ब्रह्मामुखेन ज्ञानं दत्त्वा करोति।

**हिन्दु बालकः**:- शिवोऽपि हिन्दूनाम् एव भगवान् अस्ति।

**सज्जनः**:- न, न। शिवे, शङ्करे च अन्तरम् अस्ति। शङ्करः तु पुत्रः (देवात्मा) परन्तु शिवः तु रचयिता। तस्या कृतिः शिवलिङ्गम्। सः तु शङ्करस्य अपि ज्ञानदाता रचयिता वा। स, तु आत्मानाम् पिता, न तु शरीराणाम्।

**हिन्दु बालकः**:- परमात्मा तु अधर्मस्य समये स्थाने च किञ्चिदेव रूपे (रामस्य रूपे, श्रीकृष्ण रूपे) आगच्छति।

**सज्जनः**:- नहि। परमात्मा तु सम्पूर्णे सृष्टिचक्रे (सतयुगं, त्रेतायुगं, द्वापर युगम् कलियुगम् च) एकवारमेव आगच्छति आगत्य च कलियुगम् सतयुगे परिवर्तयति। यदि वारं वारम् आगच्छति चेत् सृष्ट्याम् एतावत् अत्याचारम् न वर्द्धते।

परमात्मा कलियुगे अत्याचाराणां वर्द्धने आगत्य पापात्मानः दिव्यज्ञानेन दिव्यात्मानः करोति। (यदि वारम् वारम् (युगे युगे) परमात्मा आगच्छति तर्हि सदैव सतयुगमेव भवेत्। ते एव दिव्यात्मानः समये समये आगच्छन्ति। आगत्य च परमात्मनः संदेशं प्रसारयन्ति।

तदापिसृष्टिः सम्पूर्णरूपेण दिव्या न भवति। एतेषां आगमनेन अपि कलियुगम् आगच्छति। अन्ते परमात्मा एव आगत्य सृष्ट्याम् सतयुगम् (स्वर्गम्) करोति। यदा ते दिव्यात्मानः विकाराणां प्राप्नुवन्ति तदैव ते 'हिन्दू' इति धर्मेण प्रसिद्धाः भवन्ति।

सर्वे- **अधुना अस्माभिः सञ्जाताः यत् सर्वेषाम्**
**आत्मानाम् पिता परमात्मा शिवोऽस्ति।**

इति

**- अध्यापिका संस्कृत**
**रा० क० उ० मा० विद्यालयः**
**झडोदा कला नवदेहली-११००७२**

# वर्षावर्णनम्

– ओम प्रकाश ठाकुरः

नमो मेदुरं मेघवृन्दैः कृतम्
न जाने कुतो वारि तैः सम्भृतम्
सुखस्पर्शिनो वान्ति शीतानिलाः
विभान्तीह रम्याः समस्ता दिशः
प्रवृत्तं यदा मेघसंगर्जनं
मयूरा वितेनुः कलं नर्तनं
पतन्त्यत्र मुक्तासमा विन्दवः
सशब्दाः सुरम्याः सुसूत्रार्पिताः
सुबद्धाम्बुधारा परं राजते
क्षितिर्व्योम संयोगिनी भ्राजते
पिपासाप्रशान्त्या धरा मोदते
सुखोच्छ्वासिनीयं परं शोभते
कुनद्यो जलौघैः प्रयान्त्युत्पथं
यया नीचवृन्दं धनैर्गर्वितम्
जलैः पंकिलैमेदिनीयं भृता
यथा स्वार्थिभी राजनीतिर्वृता
बुधाः सर्वलोकान् इदं बोधयन्ति
कृतो यैः श्रमस्ते श्रियं प्राप्नुवन्ति
परं ये जनाः सर्वथा दैवभक्ता
सदा कल्पनालोकगाथासु सक्ताः ॥

# श्रेयोवर्त्य परम्

पठ पठ पठ रे मानव पठ रे
पठनं सौख्यकरम्
जगत्या स्तिमिर निकाय हरम्

पठनं सुविचारं प्रेरयते
पठनं सन्मार्गं दर्शयते
पठ मनीषिणां वरसाहित्यं
सरस-मधुर ललितम्

बन्धो, समयं वृक्षा न यापय
ये निरक्षरास्तानध्यापय
कुरु जनमंगलकार्यं सततम्
एतन्मोदभरम् ।

भाति न कमलं श्रिया विहीनं
मानवकुलमपि विद्याहीनं
विद्यार्थं तप तपो मनुज रे
परिणामे शुभदम्

काव्यं पठ किं वा इतिहासम्
पठ पठ मानव जाति विकासं
मंजुलकथावितानं पठरे
सद्यः श्रान्तिहरम्

ये पठन्ति मननं कुर्वन्ति
शुभमशुभं स्वीयं जानन्ति
उन्नतिकामानामेतद् वै
श्रेयोवर्त्य परम्

– डी-५७५ सरस्वती विहार :
नवदेहली

# वीरबाला

- डॉ० कैलाशनाथः द्विवेदी

- शेषांकः -

"स्वामिन्! यमानुजाकृपयाऽद्य मयैकः पापो नाचरितः। नश्वरशरीरमिदमप्यपवित्रं नैव जातम्।"

वीरपालो विमुग्ध इव भूत्वा जिज्ञासया तां पृष्टवान्-"प्रिये! नैवावगच्छामि किंचित्। श्रावय सर्ववृत्तान्तं स्पष्टतया माम्।"

वीरबाला विहस्य वर्णितवती कंजर कुंभाविषयकं सर्वं वृत्तान्तं संक्षेपेण- "स्वामिन्! श्रीमतां सम्मानं स्वग्रामगौरवमात्मशीलसम्मानंच रक्षितुं मयाऽद्य कुंभाजीवनलीला नैव नाशिता। अस्मत् क्षमादानेन संभवतः स भविष्ये एवं धृष्टाचरणं नैव करिष्यति। मनः शुद्धया समाजे सः सदाचरणेन पुनः प्रतिष्ठां लभेत्।" वीरपालो विहस्य वीरबालामेवं कथितवान्-" प्रिये! समाजे सज्जनाः। दुर्जनाश्च भवन्त्येव! सज्जनाः सत्संस्कारैः सदा कदाचारेभ्यो विमुखा भवन्ति। यदि ते कदाचित् किमपि कुकृत्यं कुर्वन्ति, शीलस्वभाववशात् शीघ्रमेव प्रायश्चितं कृत्वा सुकृत्यं प्रति प्रवृत्ताः भवन्ति, किन्तु दुर्जनाः, शीघ्रमेव दुष्कृत्येभ्यो दूरा न दृश्यन्ते। ते सामान्यतः स्वदोषं दूरं न कृत्वा प्रतिक्रियावादिनो भवन्ति। परिष्कारः प्रायश्चितं वाऽमीषां मनः शब्दकोशे न वर्तते।" विज्ञवीरबाला विनम्रतया एवमुक्तवती "स्वामिन्! भवाननुभवजन्यं सत्यमेव कथयति। मया तु परिस्थितिजन्यं व्यावहारिकमाचरणं समाचरितं शोधनार्थं तस्य।"

विनीतवीरपालो मन्दस्वरेण तामेवमुक्तवान् शिक्षयन्-"प्रिये ! समाजविमुखाः कंजराद्यादिमजनाः स्वभावेन करुणाक्षमादयाशीलशून्याः क्रूरा पराधिन एव भवन्ति। अतएव त्वया सदा सावधानतया गृहान्र्बाह्यकार्याणि कर्त्तव्यानि। क्षेत्रेषु कृषिकार्याय, यमुनातटे स्नानार्थं मन्दिरे देवपूजनाय च त्वया कदापि एकाकिनी नैव गन्तव्यम्। कुत्सितचित्तः कुंभा कदाचित् प्रतिक्रियावशात् किमप्यनर्थाचरणे प्रवृत्तो न भवेत्।" बुद्धिमती वीरबाला विहस्योक्तवती स्वभर्त्तारमेवम्- "स्वामिन् वीरभूमिबुन्देलखण्डस्य वीरबालाः भीरुचित्ता न भवन्ति। यथासमयं भारतीयवीरांगनाः स्वात्मसम्मानरक्षणे समर्थाः सन्ति। त्वयाऽस्मिन्

प्रसंगे काऽपि चिन्ता न करणीया। श्रीमतां स्नेहिलशुभाशीर्वादेन भगवत्कृपादृष्टिरेवाऽस्मत् प्रबलं सम्बलमस्ति।"

कालक्रमेण कुंभाविषयकघटनेयं विस्मृतेव संजाता वीरपालवीरबाला मनसो: किन्तु कंजरकुंभामनस इयं घटना विलुप्ता नाऽभवत्। प्रतिशोधाग्निना हृदयमस्य निरन्तरं प्रज्ज्वलितमिवाऽऽसीत्। येन-केन प्रकारेण स: सर्वाङ्गसुन्दरीं वीरबालां बलात् वशीकृत्य भोक्तुमिच्छितवान्। अनुकूलावसरस्यास्य प्रतीक्षायां प्रतिक्षणमाकुल इव संलक्षित: कामाकुल: कुत्सितचित्त: कुंभा।

एकदा यदा वासन्तिकवैभवश्री: समुल्लसति स्म। वीरपालग्रामेऽकौनाक्षेत्रे, शस्यसमृद्धि: क्षेत्रेभ्य: खलान्नस्थलेषु स्वर्णपरिपूर्णमंजूषेव संलक्षिता वनोपवनेषु द्रुमलता: विभिन्नपुष्पफलै-रापूरिता:, पशुपक्षिण: आबालवृद्धनरनार्य: सुरभित वासन्तिकवातावरणे परमप्रमुदिताश्च संजाता:, किन्तु कुंजर इव मदमत्त: कुंभा कामाग्निना प्रतिशोधग्निना च भृशं संतप्त आसीत्। खान-पाने, स्नान-ध्याने, उत्सावनृत्यगाने तस्य चित्तमत्यन्तं खिन्नं विरक्तमिवाऽऽसीत्।

एकस्मिन् दिने कदाचित् कामकषायितचित्त: कंजरकुंभा कैश्चित् सुहृद्भि: सार्धमर्धरात्र एवाऽकौनाग्रामं प्रति प्रतिशोधकामनया सशस्त्र: समाजगाम। निस्तब्धनिशायां कलकलनिनादिनीकालिन्दीतटवर्ति-वन्यपशुपक्षिणां तीव्रविराव: ग्राम्यकुक्कुराणां धेनूनां च क्रमश: बुक्का-हम्बाध्वनिरवर्धत्। विनिद्रितजनानां निद्राऽपि पलायितेव। वीरपालस्तदा स्वगृहाद्बहिरेवाऽऽसीत् किन्तु स्वपुत्रवीरसेनेन सह वीरबाला गृहाङ्गणे तीव्रविरावं श्रुत्वा वीरांगनाधर्मं पालयन्ती जागरिता सावधाना चाऽभवत्।

गृहपश्चिमभागे वीरबाला केषांचित् जनानां पदचापध्वनिं, मन्दवार्तालापं चाशृणोत्। त्वरितमेव प्रदीपं प्रज्ज्वलितवती सा अग्रिमां स्थितिं प्रतिक्षमाणा पर्याकुलेव सा संजाता। स्वकीयशरीरं निपुणतया निगूह्य निस्तब्धतया निरीक्षितवती तदा सा यद् गृहस्य पश्चभित्तिं तीक्ष्ण खनित्रेण विदार्य सन्धिच्छेदमार्गेण कलत्रकामुक: कुंभा स्वशिरोऽन्तर्निष्कासितवान्। वीरबाला विद्युद्गत्या तीक्ष्णं लवित्रं नीत्वा नराधमस्य तस्य त्वरितमेव शिरोऽच्छिनत्। तत्क्षणमेव प्रतिशोधार्थी स: कामुको निष्प्राणोऽभवत्।

तदन्तरं त्वरितमेव वीरबाला साहसेन सोपानमार्गेण गृहच्छदिं प्राप्य व्यलोकयत् यत् रज्जुसोपानमवलम्ब्य ऊर्ध्वमारोहणार्थं केचित् कंजराधमौ प्रयासरतौ स्त: । सा शीघ्रमेव तीक्ष्णकुठारेण न केवलं तयोर्वितीर्णंरज्जुसोपानमपितु शिरसी ह्यपि कर्तितवती।

अधोवर्तिनस्त्रय: क्रूरा: कंजरा अपि तस्या पाषाणेष्टिकाखण्डप्रहारेण प्रपलायिता:। तीव्रस्वरेणाऽऽकारितवती भयात्पलायितकंजरान् स्थातुं निश्चेष्टप्रतिवेशिजनान् च सहायतायै।

सम्पूर्णग्रामवासिनो वीरबालाऽऽह्वानं श्रुत्वा तद्गृहं यदागतवन्त: तदा तेऽपश्यन् यत् त्रय: कंजरा अपराधिनो निश्चेष्टा इव भूशायिनी मृता: वर्तन्ते, वीरबाला च कठोर कुठारहस्ता साक्षात् दूर्गेव भीमरूपिणी लक्ष्यते। ग्राम्यजनसमूहेन मुक्तकण्ठेन वीरबाला पौन:पुन्येन प्रशंसिताऽद्भुत साहसाय श्रेष्ठशौर्याय च।

कैश्चिद् ग्रामप्रमुखै: प्रधानवीरपालसहयोगिभि: तत्क्षणमेव न केवलं वीरपाल: संसूच्य घटनास्थले समानीतोऽपितु जनपदस्य जिलाधीशपुलिसप्रमुखोच्चाधिकारिणोऽपि पुलिसबलेन सार्धं समानीता अग्रिमोचितकार्यवाहीसम्पादनाय।

उच्चाधिकारिभिर्घटनास्थलस्य सूक्ष्मनिरीक्षणं कृतम्। ते घटना समये विद्यमानप्रतिवेशिप्रमुखजनानां साक्ष्यं विलिख्य, परिस्थितिजन्यं प्रमुखप्रमाणं प्राप्य, सर्वां वस्तुस्थितिं सम्यक् विभाव्य वीरबालावीरबालां वारम्बारं प्रशंसितवन्त:। ग्रामीणजनानां प्रार्थनानुसारं न केवलं तेभ्योऽपितु वीरपालप्रधानाय चाग्नेयास्त्रधारणार्थमनुज्ञापत्राणि दस्युजनरक्षणार्थं प्रदत्तानि जिलाधिकारिणा प्रसन्नतापूर्वकं तत्कालमेव। इदमपि ज्ञातं, यत् जनपदीयोच्चसमित्या वीरबालाया: वीरतायै लोकविश्रुतं नाम राष्ट्रियवीरतापदकप्रदानार्थं शासनाय संस्तुतमस्ति।

तदा ज्ञात्वेदमकौनाग्रामवासिन: सर्वे जना: परमप्रसन्ना अभवन् यदा गणतंत्रदिवसस्य राष्ट्रियपर्वे महामहिमराष्ट्रपतिना वीरांगना वीरबाला अप्रतिमसाहसशौर्यवीरतायै वीरतापदकेन सम्मानिताऽभवत्।

वस्तुत: विख्यातभारतीय वीरबालानां समज्ज्वलेतिहासे वीरबाला चारुचन्द्रिकेव प्रतिभाति। अस्या अद्भुतशौर्यसाहसवीरताबुद्धिमत्ता- दिदिव्यगुणैर्नकेवलमकौनाग्राम:, बुन्देलखण्डमपितु समस्तं भारतं विभासितं समुज्ज्वलितं च शोभते। वयं सर्वे वीरबालासदृशवीरबालाभिर्गौरवमेवाऽनुभवाम:। यदि वीरबालावन्निर्भया: नार्य: समाजे समुद्भवन्तु तर्हि निर्भयाकाण्डसदृशदुर्घटना: देशे कुत्रचिन्न संभविष्यन्ति।

-**'कुसुम कुलाय'**,
**अजीतमल: ( औरैया )**
**उत्तर प्रदेश:-२०६१२१**

# प्रतिफलम्

- डॉ० वेणीमाधव शास्त्री

पिपीलिकैका पादपमूले
वासं कुरुते सरसः कूले
मित्रैः साकं नन्दति नित्यं।
उपकारस्य च कुरुते कृत्यम्।

सा च कदाचिन्नीरं पातुं
सरसस्तीरात् तृषितं हातुं।
अवततुं सा गच्छति तीरं
अवधानेन तु पिबति च नीरम्।।

तस्मिन्नेमव तु वृक्षे तीरे
पश्यति शुकः धीरसमीरे।
हातुं यान्तीं नीरं तृष्णां
पिपीलिकां तां मुग्धां कृष्णाम्।।

पादस्खलनात् सहसा पतिता
वारि च बहुलं चित्ते व्यथिता।
धैर्येण च सा सलिले तरति
वीचीभिः सा मध्ये सरति।।

आशा तीरं गन्तुं नष्टा
वीचीभिः सा दूराकृष्टा।
वारं वारं दैवं निन्दति
देवं स्मृत्वा धैर्यं विन्दति।।

तस्मिन् काले कीरो वृक्षे
वसति चिरं यः कोटर कक्षे।
शाखायामुपविश्य चिरं सः
खादति स्म फलमेव परं सः।।

शनैः तस्या धैर्यं नश्यन्ति
तत्र च कीरो नीरे पश्यति।
पत्रस्योपरि पत्रं क्षिपति
वारिणि धैर्यगिरश्चालपति।।

अहहा पश्यतु दैवविचित्रं
लब्धं शरणं सलिले चित्रं।
आरुह्येकं याति च पत्रं
प्रणमति चित्ते कीरसुपुत्रम्।।

अन्यस्मिन् खलु दिवसे बाधः
तत्रागच्छति कश्चित् व्याधः।
स्थित्वा पश्चात् लक्ष्ये बद्धः
शरं शुकं तं मोक्तुं सिद्धः।।

पिपीलिका सा दृष्टवती तं
शीघ्रं व्याधं दष्टवती तम्।
चरणे दंशात् च्युतः बाणः
शुको हि जातस्त्रातप्राणः।।

गृद्धोऽप्यपरः पुरतो वृक्षे
खादितुकामः शाखाकक्षे।
कीरं पश्यन् शाखां श्रितः
लक्ष्यच्युत-बीणेन च मृतः।।

कोलाहलेन सहसा बुद्ध्वा
कीरः पश्यति दृष्टिं बुद्ध्वा।
पिपीलिका खलु शनैः याति
उपकारस्य च महिमा भाति।।

**- भामती वेन्द्रमार्गम्**
**साधन केरी धारवाडः**
**कर्नाटकम्**

# दयालुः सर्व-प्रियः

- डॉ० नारायणशास्त्री काङ्करः

सप्तम-कक्षायाः छात्रः श्यामः यदा नियत-समये विद्यालयतः गृहं नैव प्रत्यागतः। तदा बहुः समय-पर्यन्तं प्रतीक्षां कृत्वा तस्य इतस्ततः सहपाठिनां गृहेषु अन्वेषणं कर्त्तुं प्रारब्धम्। किन्तु नाना-शङ्का-कुलिनयोः माता-पित्रोः न किम् अपि सत्यं मिलितम्। सः एकलः एव तु तयोः कुल-दीपकः आसीत्। आरक्षि-स्थाने सूचयितुं तौ प्रस्थातुम् उद्यतौ एव आस्तां यत् एकः अपरिचितः जनः उपस्थितः। सः आत्मानं चिकित्सालयस्य कर्मचारिणं परिचायन् कथितवान्-

''महाशय! भवत्-पुत्रः चिकित्सालये विद्यते। भवन्तं सूचयितुम् एव इह अहम् उपस्थितः अस्मि। चिन्तायाः न का अपि वार्त्ता।'' इति उक्त्वा तत्क्षणम् एव निर्गतः।

माता-पितरौ गत्वा दृष्टवन्तौ यत् तयोः पुत्रः सकुशलः अस्ति। चिकित्सकाः असूचयन् यत्'' अस्य एव सहयोगेन तस्य अक्षिदन्ते क्षत-विक्षतस्य पथिकस्य प्राणाः सुरक्षिताः। अयम् एव तत्र अत्र आनीतवान्। धन्यौ भवन्तौ इयं सुपुत्रं प्राप्य।'' इति।

-शिक्षा-

**जाति धर्मं वयो लिङ्गं, दया नैव प्रपश्यति।**
**यस्मिन् दया दयालुः स, सर्वस्यापि प्रियो भवेत्॥**

- विद्या वैभव भवनम्
२९-केसर-विहारः
जगतपुरा, जयपुर-३०२०१७
(राजस्थानम्)

# इयं मे प्रार्थना भगवन्

- डॉ० देवीसहाय पाण्डेय

देहि विद्या बलं ज्ञानं वयं ते बालका भगवन्।
देहि चारित्र्यमहिमानं वयं ते बालका भगवन्।
पुण्यकर्तव्यपथगमनम् भवतु नः शुभगतिर्भगवन्।
देशसेवानुरागे च भवतु नः शुभमतिर्भगवन्।
सदाकरवाम बलिदानं वयंते बालका भगवन्।
देहि सेवासदाचारं जीवनं निर्विकारं च।
आत्मभावस्यविस्तारं परोपकारं सुधारु च।
देहि सारल्यसम्मानं वयं ते बालका भगवन्।।

# तद्देशे मे भवतु निवासः

यत्र मातृभावना विकासः सच्चरित्र्य सुवासः।
यत्र करोति सदाचारः शुभमानवता श्रृंगारम्।
यत्र न कोऽपि करोति किंचिदपि कपटपूर्ण व्यवहारम्।
यत्र लेखनीखड्गयोर्मध्ये न विरोधाभासः।
तद्देशे मे भवतु निवासः।।
यत्र न भवति कदापि शासनं लोलुपदृष्टजनानाम्।
यत्र न मन्त्रं चलतिखलानां पापकर्मलिप्तानाम्।
यत्र विकास, सौख्यसुवास, सत्सौभाग्य सुहासः।
तद्देशे मे भवतु निवासः।।

## भारतगौरवम्

वेदज्ञानमदात् भारतम्।
आत्मज्ञानमदात् भारतम्।।
धर्मक्षेत्रे युद्धक्षेत्रे।
गीताज्ञानमदात् भारतम्।
देशं तथा विदेशं गत्वा
विविधज्ञानमदात् भारतम्।
शून्यज्ञानमदात् भारतम्।
गणितज्ञानमदात् भारतम्।
कियद्दूरमस्तीति चन्द्रमा।
जगते ज्ञानमदात् भारतम्।।

## नभसि तारकः

उच्चैर्दीव्यति नभसि तारकः
दिव्यदीप इव तमसि तारकः।
गगनतरोः पुष्पमिव भव्यं
चित्तं कस्य न हरति तारकः।
विलसति विकसितकमलं सदृशं
निर्मलनभसः सरसि तारकः।
नभो दीपयति हीरककण इव
अतुलितशोभां भरति तारकः।
चन्द्रसभायां यथा सदस्यः
चन्द्रमसं अनुसरति तारकः।।

**- लवकुश नगरम् कालोनी, रामघाटः**
**अयोध्या, जिला-फैजाबादः**
**उत्तर प्रदेशः-२२४१२३**

# सुरम्य-भारतं भजे

- डॉ० रामचन्द्रः द्विवेदी

धरा-धरेन्द्र-शेखरं नदीशपाद-पूजितम्,
विहंगवृन्द-कूजितं सुरेन्द्र-चाप भूषितम्।
समस्त-लोक-भूषणं तथा विमुक्त-दूषणम्,
त्रिदेव-देव-पूजितं विशुद्ध-भारतं भजे।।

दया-क्षमा-प्रदायकं समस्त-लोक-नायकम्,
प्रताप-ताप-भास्वरं दुखीजने कृपाकरम्।
पुराण-पंथ-ग्राहकं नवीन-ज्ञान-साधकम्
सदा शरण्य-रक्षकं विमुक्त-भारतं भजे।।

मुनीन्द्रपाद-सेवितं सुधीन्द्र-शक्ति-प्रेरितम्,
कबीन्द्र-बाव्य-गुञ्जितं नरेन्द्र-नीति-निर्मलम्।
धनेन्द्र-दान-दीपितम् अरीन्द्र-मान-मर्दकम्,
समस्त-भोग-दायकं विनम्र-भारतं भजे।।

वसन्त-वास-वासितं, सुग्रीष्म-ताप-तापितम्,
सुरम्य-मेघ-मण्डितं शरद्-हिमांशु-शोभितम्।
हिमे हिमेन रञ्जितं प्रभाकरेण पोषितम्,
निशाकरेण दीपितं सुरम्य-भारतं भजे।।

-४६-एच-पॉकेटः
शेखसरायः फेस-II
नव देहली

# देशप्रेमी नरेन्द्रः

–पंकज कुमार झा

## शेषांकः

### ॥ अथ चतुर्थं दृश्यम्॥

(एतदन्तरं नरेन्द्रस्य अधिकः समयः ध्यानकरणे व्यतीतो भवति स्म। एतस्मात् तेन सन्यासव्रतो गृहीतः। संन्यासाश्रमे भिक्षावृत्त्या स्वजीवनयापनं तेन कृतमेकदा उत्तरप्रदेशस्य एकस्मिन् स्थले बुभुक्षया पिपासया च व्याकुलः सन् सः परमातपे तिष्ठन् किंचिद्विचारयति स्म, तदानीमेव एकः धनिकः तं नरेन्द्रनाथं दृष्ट्वा)

**धनिकः**:- मनुष्यः कदापि संन्यासी न भवितव्यः (एवमुक्त्वा सः हसन् स्वामिजीवमभिलक्ष्य) पश्यतु अहं सुन्दरं भोजनं करोमीदानीम्। मम पार्श्वे पानाय शुद्धं शीतलं च जलमस्ति। अहं रूप्यकाणि अर्जयामि एतस्मादेतत् सर्वं सुखं मां परितः व्रजति त्वं च रूप्यकाणि न अर्जयसि। एतस्मादीदृशी दशा तव (एवमुक्त्वा परिहस्य च एकं श्लोकं निगदति।)

**धनैर्निष्कुलीनाः कुलीनाः भवन्ति**
**धनैरापदं मानवाः निस्तरन्ति।**
**धनेभ्यः परो बान्धवो नास्ति लोके**
**धनान्यर्जयध्वं धनान्यर्जयध्वम्॥**

(एवं कथयन् सः तत्रैव स्थित्वा स्वामिजीवं पश्यति। स्वामिजीवः अस्योत्तररूपेण किंचिदपि न वदति तदानीमेव एकाश्चर्यघटना घटिता –एकः वणिक् ततः आगत्य किंचिन्निवेदयति स्वामिजीवाय)

**वणिक्**–देव! एतत् सर्वं भुक्त्वा मामनुगृह्णन्तु भवन्तः। एतदासनं एतत् पाद्यं एतन्मिष्टान्नम्। सर्वं भवते निवेदयामि। कृपया एतत् सर्वं स्वीकुरु भगवन!

**स्वामिजीवः**:- हे वयस्य! प्रतीतो भवति यत् कश्चिद् भ्रमोऽस्ति भवतः मनसि, अहं न स्मरामि यत् कदाप्यस्माकं मेलनमभवद्वा ?

(तदानीं वणिक्)

**वणिक्**- परन्तु हे स्वामिन्! भवानेव सः मानवोऽस्ति यमहं ह्यः स्वप्ने अपश्यम्। यत् साक्षाच्छ्रीराम एव मम स्वप्ने आगत्य एतन्निबोधितवान् यदहमस्मिन् स्थले आगत्य भवते सर्वं निवेदयामीति। कृपया एतत् सर्वं स्वीकुरु भगवन्!

(स्वामिजीवः प्रेमपूर्वकेण सर्वमगृह्णात्- एतत् सर्वं दृष्ट्वा सः धनिकः सत्वरमेव सर्वमबोधयद् यदेषः कश्चित् सामान्यो न अपितु कश्चन विशिष्टः पुरुषोऽस्ति। सः धनिकः स्वामिजीवनस्य चरणे निपत्य अवदद् यत्-)

**धनिकः**- क्षन्तव्यः, क्षन्तव्यो मेऽपराधः भगवन्! अहं न जानामि स्म यद् भवान् देवांश एव। क्षन्तव्यः, क्षन्तव्यो मेऽपराधः।

## ॥ अथ पंचमं दृश्यम्॥

(एवमेव भ्रामं -भ्रामं स्वामिजीवः राजस्थानस्य अलवरक्षेत्रं प्राप्तवान्।)

(अलवरमहाराजस्यावस्थानम् । सिंहासने सुखोपविष्टः राजा मंगलसिंहः पार्श्वे मन्त्रिणः सभायाम् उपविष्टाः सज्जनाश्च। एकः द्वारपालः आगत्य राजानं कथयति।)

**द्वारपालः**- (प्रविश्य) जयतु महाराज! जयतु महाराज!।

**राजामंगलसिंहः**- ओम् द्वारिक! कथय का वार्त्ता अस्ति?

**द्वारपालः**- महाराज! एकः पुरुषः भवद्भिर्सह मेलनमिच्छति।

**राजामंगलसिंहः**- ओम्! सश्रद्धं तं पुरुषमानय। (द्वारपालः स्वामिविवेकानन्देन सह तस्मिन् सभागारे प्रविशति।)

**राजामंगलसिंहः**- (सस्मितं हस्तारविन्दे संयोज्य च) आगच्छन्तु, आगच्छन्तु भवन्तः। अद्य भवतः चरणारविन्दसंयोगेन ममायं सभागारः तीर्थमिवेदानीं संशोभते। (तदानीं राज्ञः स्वामिजीवस्य च मध्ये एका रुचिपूर्णा चर्चा जाता।)

**राजामंगलसिंहः**- (स्वागतमुद्रया) स्वामिन्! मम मूत्तिपूजायां विश्वासः नास्ति। तथा चाहं कामपि पाषाणमृत्तिकाधातुभ्यः निर्मितमूर्त्तिमर्चयितुं नैव शक्नोमि। (तदानीं स्वामिजीवः)

**स्वामिजीवः**- महाराज!

**काष्ठे न विद्यते देवः पाषाणे न च मृण्मये।**
**भावे हि विद्यते देवः तस्माद् भावो हि कारणम्॥**

**राजामंगलसिंहः**- अर्थात् भगवन्!

**स्वामिजीवः**- हूँ........अहं ज्ञापयामि। अमात्य ! अत्रागच्छतु।

**अमात्यः**- आज्ञापयतु स्वामिन्!

**स्वामिजीवः**- अमात्य! महाराजस्य एकं सुन्दरं चित्रमानय।

**अमात्यः**– यदाज्ञापयति स्वामिन्! इत एव आनयामि। (अमात्यः तथैव करोति।)

**अमात्यः**– (चित्रं प्रदर्श्य) इदं गृह्णातु भगवन्!। चित्रमिदं भवतः पुरस्तादेव।

**स्वामिजीवः**– अमात्य ! अस्मिन् चित्रोपरिष्ठीवतु।

**अमात्यः**– स्वामिन्! किं प्रलपति भवान्! ? इदं मम अन्नदातुश्चित्रम्। अहं कथस्मिन् ष्ठीवेयम्?

**स्वामिजीवः**– पश्यतु महाराज! यद्यपि भवान् अस्मिन् चित्रे साक्षादुपस्थितो नास्ति। तथापि भवताममात्य अस्मिन् मुखस्रावं दातुं नेच्छति। इदं चित्रं तु कागदमात्रं तथापि पश्यतु भवत अमात्यस्य श्रद्धाम्। यः भवतः चित्रं दृष्ट्वा भवतः स्मरणं करोति। तस्मात् स्मरणकारणादेव निष्ठ्यूतकरणे अक्षमः। तेनैव भक्ताः भगवदर्चा मूत्तौ तस्य स्मरणं कृत्वा एकां कल्पनां निर्माय मूर्त्तरूपं कृत्वा तस्य स्मरणानुसारेण वैदिकरीत्या च ''मनोज्जूतिरिति'' मन्त्रैः प्राणप्रतिष्ठापनं कृत्वा अर्चन्ति। वस्तुतः ते तस्यैकेश्वरस्य विशिष्टरूपं स्मारं-स्मारं वरिवस्यन्ति। कमपि पाषाणं वा धातुं न अत एव मयोक्तं यत्–

**'' काष्ठे न विद्यते देवः..........''** **( इदं ज्ञात्वा राजामंगलसिंहः )**

**राजामंगलसिंहः**– (करयुगलं संयोज्य) भगवन्! अद्यतनं यावदहं मूर्त्तिपूजायाः अर्थं न ज्ञातवान्। अद्य भवता मम नेत्रे उद्घाटिते। एतस्मै कोटि-कोटि साधुवादं ददाम्यहम्।

(इति पंचमं दृश्यम्)

**॥ अथ षष्ठं दृश्यम्॥**

(एतदनन्तरं बहुजनानां सहयोगेन स्वामिविवेकानन्दः विश्वधर्ममहासभायां स्वदेशस्य प्रतिनिधिरूपेण धर्मस्याख्यानं दातुं विश्वमंचोपरि सिंह इव अवतरितवान्। सर्वप्रथमं स्वामिजीवस्य सम्बोधनं श्रुत्वा मिनटद्वयं यावत् करतालध्वनिना सर्वे तस्य स्वागतमकुर्वन्।)

**स्वामिजीवः**– अमेरिकावासिनो मम प्रिया भ्रातरो भगिन्यश्च!

भवन्तः येन सौहार्देन सह अस्माकं स्वागतं कृतवन्तः। तं प्रति आभारं प्रकटयितुं मम हृदयः अवर्णनीयहर्षेण पूर्णो भवति। संसारे संन्यासिनां सर्वोत्तमा प्राचीना परम्परा पक्षतः अहं सर्वेभ्यः धन्यवादं ददामि। धर्माणां मातृ पार्श्वतः धन्यवादं व्याहरामि तथा समेषां सम्प्रदायानामथ च विभिन्नमतावलम्बिकोटिकोटिहिन्दूनां पक्षतोऽपि अहं सर्वेभ्यः धन्यवादं ददामि। अहमस्मान्मंचाद् वक्ष्यमाणानां तेषां वक्तृणां कृतेऽपि धन्यवादं प्रकटयामि। यैः पश्चिमदेशीयप्रतिनिधिनामुल्लेखसमये भवतः ज्ञापितवान् यत् सुदूरदेशस्य एते जना अपि सहिष्णुतायाः भावं विविधदेशेषु प्रसारितुं समर्थाः सन्ति। अहमीदृशस्य धर्मस्य अनुयायी भवने गर्वमनुभवामि। येन संसाराय सहिष्णुतायाः तथा सार्वभौमस्य स्वीकृतेः

उभयोरपि शिक्षा प्रदत्ता।

वयं केवलं सर्वान् धर्मान् प्रति सहिष्णुतायामेव न विश्वसिमः अपितु सर्वान् धर्मान् सत्यं मत्वा स्वीकुर्मः। अहं सगर्वेण वदामि यदहमीदृशस्य देशस्य जनः अस्मि। येन अस्याः सम्पूर्ण पृथिव्याः समस्त धर्माणां देशानां च उत्पीडितजनाः शरणार्थिमानवाश्च आश्रयाः प्रदत्ताः। भ्रातरः अहम् एकस्य स्तोत्रस्य कांचन पंक्तिं श्रावयामि। यस्याः आवृत्तिमहमाबाल्यात् करोमि-

**'' रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥''**

अर्थात् यथा विभिन्न नद्यः भिन्न-भिन्न स्रोतान् निर्गम्य समुद्रे मिलन्ति। तेनैव प्रकारेण हे प्रभो! विभिन्न रुच्यनुसारेण कुटिल ऋजु मार्गेण च गच्छतः मानवाः प्राणिनश्च त्वयि एव मिलन्ति।

इयं सभा या अद्यतनेषु आयोजितेषु सर्वश्रेष्ठसम्मेलनेषु अन्यतमाऽस्ति। स्वत एव गीतायाः इममद्भुतोपदेशं प्रतिपाद्य जगत् प्रति तस्य घोषणां सडिम्डिमेन उद्घोषयति यत्-

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।**
**मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः॥**

अहमान्तरिकरूपेण आशाऽसे यदद्य प्रातः अस्यां सभायां सम्मानक्रमे या घण्टाध्वनि निनादिता। सा सम्पूर्ण धर्मान्धतायाः पारस्परिक कटुतायाश्च मृत्युनिनादः सिद्धेदिति। तथाहं 'सर्वं खल्विदं ब्रह्म' इति भावं मन्ये अथ च यथाऽहम् एको विवेकानन्दोऽस्मि तथैव भारतस्य प्रत्येक गृहे विवेकानन्दः नरीनृत्यतु इत्यभिलषति मे मनः।
( तदानीमेव सर्वत्र विवेकानन्दाः प्रादुर्भवन्ति तथा च पुष्पवृष्टिर्भवति)

**रामकृष्णस्य भक्तः सुधीशः परः**
**ध्यानमग्ने सदा शम्भुरूपे रतः।**
**ज्ञानशब्दाद्य आनन्दशब्दोऽपरः**
**देशप्रेमी नरेन्द्रः सदा राजताम्॥**

**॥इति षष्ठं दृश्यम्॥**

-नीरा-सदनम्
आर.एल.सर्राफ.मार्गः
बी. देवघरः, झारखण्डम्-८१४११२

# "संस्कृत मंजरी"

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

## "संस्कृत मंजरी"

( आई.एस.एस.एन.-२२७८ -८३६० )

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवेदनाओं, शोध निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है ।

**मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.१००/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मंजरी"

**के स्थायी अध्येता बनें ।**

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

**सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-२३४७-१५६५ )

संस्कृत भाषा के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्य : - एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु.२५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें ।**

आज ही अपना वार्षिक सदस्यता शुल्क नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट द्वारा सचिव, दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें । शुल्क मल्टी सिटी चैक द्वारा स्वीकार्य होगा।

पत्र व्यवहार का पता--

**सचिव/सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं. ५, झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.-०११-२३६३५५९२, २३६८१८३५**

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।